This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M2420(4)

कविकुलगुरू कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M2420(4) विषय पुराण

नाव अथ श्रीमद्‌ध्यात्म रामायण किष्किंधा कांड

लेखक/लिपीकार राम वर्मा

पृष्ठ .... काळ .... पूर्ण/~~अपूर्ण~~

M2420(4)

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथश्रीमदध्यात्मरामायणसुंदरकांडःप्रारभ्यते॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः शतेति लिलंघयिषुः स्वार्थेणिच् आनंदसंदोहः तत्समूहरूपः तत्समूहवान्वा १ २ रामनिर्मुक्तंरामस्यत्कंप-
श्यामीति भाविन्यपिवर्तमानत्वारोपोऽवश्यंभावित्वद्योतनाय ३ कृतार्थःजगन्मातृदर्शनेनेतिभावः ममसमुद्रलंघनमकिंचित्क
रमित्याह प्राणेति ४ अपारमित्युभयान्वयि त्रिविधपरिच्छेदशून्यंतत्पदं तत्स्वरूपम् तदंगभूतायाअंगुलिस्तद्भूषणभूताया

श्रीमहादेवउवा शतयोजनविस्तीर्णंसमुद्रंमकरालयम् लिलंघयिषुरानंदसंदोहोमारुतात्मजः १ ध्यात्वा
रामंपरात्मानमिदंवचनमब्रवीत् पश्यंतुवानराःसर्वेगच्छंतंमांविहायसा २ अमोघंरामनिर्मुक्तंमहा
बाणमिवाखिलाः पश्याम्यद्येवरामस्यपत्नींजनकनंदिनीम् ३ कृतार्थोऽहंकृतार्थोऽहंपुनः पश्यामिराघ
वम् प्राणप्रयाणसमयेयस्यनामसकृत्स्मरन् ४ नरस्तीर्त्वाभवांभोधिमपारंयातितत्पदम् किंपुनस्तस्य
दूतोऽहंतदंगांगुलिमुद्रिकः ५ तमेवहृदयेध्यात्वालंघयाम्यल्पवारिधिम् इत्युक्त्वाहनुमान्बाहूप्रसार्यायं
तवालधिः ६ ऋजुग्रीवोऽर्ध्वदृष्टिः सन्नाकुंचितपदद्वयः दक्षिणाभिमुखस्तूर्णंप्लुप्लुवेऽनिलविक्रमः ७
आकाशात्त्वरितंदेवैर्वीक्ष्यमाणोजगामसः दृष्ट्वाऽनिलसुतंदेवागच्छंतंवायुवेगतः ८ परीक्षणार्थंसत्व-
स्यवानरस्येदमब्रुवन् गच्छत्येषमहासत्वोवानरोवायुविक्रमः ९

मुद्रिकासाअस्यास्तीत्यर्शाद्यच् ५ अल्पवारिधि
मित्यपारभवांभोधेर्व्यतिरेकालंकारः तंलंघयामीतिकिंवक्तव्यमित्यन्वयः बाहूइत्यादिवानरोप्लुवनजातिवर्णनम् आयतवालधिः
प्रसारितपुच्छः ६ ऋजुग्रीवऊर्ध्वदृष्टिरित्यर्थः कर्मधारयः अनिलोवायुःतत्सदृशपराक्रमः ७ आकाशात् आकाशेस्थित्वेत्यर्थः ८ वान
रस्यसत्वस्य वानरीयबलस्यपरीक्षणार्थमिदमब्रुवन् विचारयामासुरित्यर्थः नदृश्यति एवंविचार्येतिधातूनामनेकार्थत्वाद्ब्रुवोपिविचारेवृत्तिः
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लंकाप्रवेशेशक्तोऽथवानेतिसंदेहस्तस्मादस्यबलंजानीमहेनिर्णेष्यामइत्यर्थः १० देवतावृंदः देवतासमूहः ११ १२ १३ क्षुधयासंपीडित

लंकांप्रवेष्टुंशक्तोवानवाजानीमहेबलम् एवंविचार्यनागानांमातरंसुरसाभिधाम् १० अब्रवीद्देवतावृंदःकौतूहलसमन्वितः गच्छत्वंवानरेंद्रस्यकिंचिद्विघ्नंसमाचर ११ ज्ञात्वातस्यबलंबुद्धिंपुनरेहित्वरान्विता इत्युक्तासाययौशीघ्रंहनुमद्विघ्नकारणात् १२ आवृत्यमार्गंपुरतःस्थित्वावानरमब्रवीत् एहिमेवदनंशीघ्रंप्रविशत्वमहामते १३ देवैस्त्वंकल्पितोभक्षःक्षुधासंपीडितात्मनः तामाहहनुमान्मातरहंरामस्यशासनात् १४ गच्छामिजानकींद्रष्टुंपुनरागम्यसत्वरः रामायकुशलंतस्याःकथयित्वात्वदाननम् १५ निवेक्ष्येदेहिमेमार्गंसुरसायैनमोस्तुते इत्युक्तापुनरेवाहसुरसाक्षुधितास्म्यहम् १६ प्रविश्यगच्छमेवक्त्रंनोचेत्त्वांभक्षयाम्यहम् इत्युक्तोहनुमानाहमुखंशीघ्रंविदारय १७ प्रविश्यवदनंतेऽद्यगच्छामित्वरयान्वितः इत्युक्त्वायोजनायामदेहोभूत्वापुरःस्थितः १८ दृष्ट्वाहनुमतोरूपंसुरसापंचयोजनम् मुखंचकारहनुमान्द्विगुणंरूपमादधत् १९ ततश्चकारसुरसायोजनानांचविंशतिम् वक्त्रंचकारहनुमांस्त्रिंशद्योजनसम्मितम् २०

आत्मायस्यास्तस्याइत्यर्थः १४ १५ निवेक्ष्येप्रवेक्ष्यामि १६ मेवक्त्रंप्रविश्यततोनिसृत्यगच्छेत्यर्थः १७ योजनमात्रदीर्घदेहः १८ १९ त्रिंशद्योजनसंमितंवपुश्चकारेतिशेषः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ २२ २३ पुनर्गत्वाकिष्किंधामितिशेषः २४ २५ मणिकांचनपर्वतंमण्यादियुक्तशृंगयुतंपर्वतम् २६ सचिवोभवमध्येविश्रामदानेनसहायो भवेत्यर्थः तत्सहायार्थनिमित्तंमत्प्रेरणेकोहेतुस्तत्राह सगरैरिति पुरापूर्वंसगरैर्वर्द्धितइति हेतोरहंसागरस्तन्नामाभवम् २७ तस्यवंशे

ततश्चकारस्फुरसापंचाशद्योजनायतम् वक्त्रंतदाहनूमांस्तुबभूवांगुष्ठसन्निभः २१ प्रविश्यवदनंतस्याःपुन रेत्यपुरःस्थितः प्रविष्टोनिर्गतोहंतेवदनंदेवितेनमः २२ एवंवदंतंदृष्ट्वासाहनूमंतमथाब्रवीत् गच्छसाधय रामस्यकार्यंबुद्धिमतांवर २३ देवैःसंप्रेषिताहंतेबलंजिज्ञासुभिःकपे दृष्ट्वासीतांपुनर्गत्वारामंद्रक्ष्यसिगच्छ भो २४ इत्युक्त्वासाययौदेवलोकंवायुसुतःपुनः जगामवायुमार्गेणगरुत्मानिवपक्षिराट् २५ समुद्रोप्याह मैनाकंमणिकांचनपर्वतम् गच्छत्येषमहासत्वोहनुमान्मारुतात्मजः २६ रामस्यकार्यसिद्ध्यर्थंतस्यत्वंस चिवोभव सगरैर्वर्धितोयस्मात्पुराहंसागरोऽभवम् २७ तस्यान्वयेबभूवासौरामोदाशरथिःप्रभुः तस्य कार्यार्थसिद्ध्यर्थंगच्छत्येषमहाकपिः २८ त्वमुत्तिष्ठजलात्तूर्णंत्वयिविश्राम्यगच्छतु सतथेतिप्रादुरभूज्ज लमध्यान्महोन्नतः २९ नानामणिमयैःशृंगैस्तस्योपरिनराकृतिः प्राहयांतंहनूमंतंमैनाकोहंमहाकपे ३० स मुद्रेणसमादिष्टस्त्वद्विश्रामायमारुते आगच्छामृतकल्पानिजग्ध्वापक्वफलानिमे ३१ विश्राम्यात्रक्षणंपश्चा द्गमिष्यसियथासुखम् एवमुक्तोथतंप्राहहनूमान्मारुतात्मजः ३२

चरामस्तत्कार्यार्थंचायंगच्छति २८ अतस्त्वमुत्तिष्ठे त्यन्वयः २९ नानामणिमयैःशृंगैर्महोन्नतइत्यन्वयः तस्योपरिनराकृतिर्मनुष्याकारेणास्थितोमैनाकःप्राह ३० ३१ विश्राम्येत्यार्षम् ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कथंभवेदित्यादेरनुचिंतंतदित्यर्थः तत्रहेतुर्गतव्यंत्वरितंमयेति ३३ कराग्रेणस्पृष्टशिखरोययाविसन्वयः छायास्पर्शमात्रेणजंतूनांगतिनि
रोधेनाकर्षकश्छायाग्रहइत्युच्यते ३४ तदेवाह सिंहिकेति भक्षयति इत्यर्थे आर्षः ३५ ३६ विस्मय आश्चर्यंयत्कस्याप्यदर्शनंवे
गरोधश्चेत्याश्चर्यम् प्रसारयत् प्रसारयत अडभावआर्षः ३७ सिंहिकाम् तन्नाम्नींराक्षसीम् ३८ दक्षिणंकूलंसागरस्येतिशेषः

गच्छतोरामकार्यार्थंभक्षणंमेकथंभवेत् विश्रामोवाकथंमेस्याद्गंतव्यंत्वरितंमया ३३ इत्युक्त्वास्पृष्टशिखरः
कराग्रेणययौकपिः किंचिद्दूरंगतस्यास्यछायांछायाग्रहोग्रहीत् ३४ सिंहिकानामसाघोराजलमध्येस्थिता
सदा आकाशगामिनांछायामाक्रम्याकृष्यभक्षयेत् ३५ तयागृहीतोहनुमांश्चिंतयामाससवीर्यवान् केनेदं
मेकृतंवेगरोधनंविघ्नकारिणा ३६ दृश्यतेनैवकोप्यत्रविस्मयोमेप्रजायते एवंविचिंत्यहनुमानधोहष्टिंप्र
सारयत् ३७ तत्रदृष्ट्वामहाकायांसिंहिकांघोररूपिणीम् पपातसलिलेतूर्णंपद्भ्यामेवाहनद्रुषा ३८ पुन
रुत्पुत्यहनुमान्दक्षिणाभिमुखोययौ ततोदक्षिणमासाद्यकूलंनानाफलद्रुमम् ३९ नानापक्षिमृगाकीर्णंना
नापुष्पलतावृतम् ततोददर्शनगरंत्रिकूटाचलमूर्द्धनि ४० प्राकारैर्बहुभिर्युक्तंपरिखाभिश्चसर्वतः प्रवेक्ष्या
मिकथंलंकामितिचिंतापरोऽभवत् रात्रौवेक्ष्यामिसूक्ष्मोऽहंलंकांरावणपालिताम् एवंविचिंत्यतत्रैवस्थि
त्वालंकांजगामसः ४२ धृत्वासूक्ष्मंवपुर्द्वारंप्रविवेशप्रतापवान् तत्रलंकापुरीसाक्षाद्राक्षसीवेषधारिणी ४३

३९ ४० बहुभिःप्रकारैः अंतर्दुर्गमध्यदुर्गबहिर्दुर्गसंबंधिभिः परिखाः प्राकारबहिर्गर्त्ताः ४१ वेक्ष्यामिप्रवेक्ष्यामि सूक्ष्मः सूक्ष्मश
रीरोभूत्वेत्यर्थः लंकांजगाम रात्राविति शेषः ४२ सूक्ष्मंवपुर्धृत्वाद्वारंप्रविवेश ४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वर्धमाकारः २६ किलकिलाशब्दोवानराणांक्रोधभयादिकालिकः शब्दः २७ समापत्यगृहाच्चलित्वा २८ लक्ष्मणसामीप्यंगत्वाप्राप्य
२९ प्रियवर्द्धनः प्रियाणांवृद्धिकरणशीलः ३० रौद्रमूर्तिनावालिवधकालिकमूर्तिना ३१ लक्ष्मणोबहिः स्थितइतिन्यवेदयत् इत्यन्वयः ३२

ज्याघोषमकरोत्तीव्रंभीषयन्सर्वबानरान् तंदृष्ट्वाप्राद्रुतास्तत्रवानरावप्रमूर्द्धनि २६ चक्रुः किलकिलाशब्दं
धृतपाषाणपादपाः तान्दृष्ट्वाक्रोधताम्राक्षोवानरान्लक्ष्मणस्तदा २७ निर्मूलान्कर्तुमुद्युक्तोधनुरानम्यवीर्य
वान् ततः शीघ्रंसमापत्यज्ञात्वालक्ष्मणमागतम् २८ निवार्यवानरान्सर्वानंगदोमंत्रिसत्तमः गत्वालक्ष्मणसा
मीप्यंप्रणनामसदंडवत् २९ ततोंगदंपरिष्वज्यलक्ष्मणः प्रियवर्द्धनः उवाचवत्सगच्छत्वंपितृव्यायनिवेदय ३०
मामागतंराघवेणचोदितंरौद्रमूर्त्तिना तथेतित्वरितंगत्वासुग्रीवायन्यवेदयत् ३१ लक्ष्मणः क्रोधताम्राक्षःपु
रद्वारिबहिःस्थितः तच्छ्रुत्वातीवसंत्रस्तः सुग्रीवोवानरेश्वरः ३२ आहूयमंत्रिणांश्रेष्ठंहनूमंतमथाब्रवीत् गच्छ
त्वमंगदेनाशुलक्ष्मणंविनयान्वितः ३३ सांत्वयन्कोपितंवीरंशनैरानयमंदिरम् प्रेषयित्वाहनूमंतंतारामाहक
पीश्वरः ३४ त्वंगच्छसांत्वयंतीनंलक्ष्मणंमृदुभाषितैः शांतमंतःपुरंनीत्वापश्चाद्दर्शयमेनघं ३५ भवत्विति
ततस्तारामध्यकक्षंसमाविशत् हनूमानंगदेनैवसहितोलक्ष्मणांतिकम् ३६

लक्ष्मणंतन्निकटम् ३३ कोपितंसंजातको
पंसांत्वयन् क्षमावंतंकुर्वन् मंदिरमानय प्रापय ३४ मृदुभाषितैः सांत्वयंतीलक्ष्मणंप्रतिगच्छ ततः शांतंशांतकोपंकृत्वाततोंतःपुरं
नीत्वा अनेनात्यंतमित्रतामदर्शनंमेमांदर्शय ३५ मध्यकक्षंस्त्रीणांमर्यादास्थलम् ३६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अशंकितमेहियतइदंभवद्गृहम् ३७ राजदारादीन् दृष्ट्वेत्यनेनसेवकदारदर्शनेयथाराज्ञो नसंकोचः तथास्मद्राजदारदर्शनेतवसंको
चोनोचितइतिभावः ३८ गृह्येत्यार्षम् ३९ यूथपानांमहासौधान् गृहानित्यर्थः ४० ताराधिपाननाचंद्रमुखी ४१ आदौस्वस्यसेवकत्वालुक्ष्म
णस्यभगवदवतारत्वाच्चनत्वापश्चान्मित्रभावेनदेवरेत्युक्तिः त्वंसाधुर्भक्तवत्सलोऽतोभक्तेष्वीदृशः कोपोनुचितइतिभावः ४२ अका-

गत्वाननामशिरसाभक्त्यास्वागतमब्रवीत् एहिवीरमहाभागभवद्गृहमशंकितम् ३७ प्रविश्यराजदारादी
न्दृष्ट्वासुग्रीवमेवच यदाज्ञापयसेपश्चात्तत्सर्वंकरवाणिभो ३८ इत्युक्त्वालक्ष्मणंभक्त्याकरेगृह्यसमारु
तिः आनयामासनगरमध्याद्राजगृहंप्रति ३९ पश्यंस्तत्रमहासौधान् यूथपानांसमंततः जगामभवनंराज्ञः
सुरेंद्रभवनोपमम् ४० मध्यकक्षगतातत्रताराताराधिपानना सर्वाभरणसंपन्नामदरक्तांतलोचना ४१
उवाचलक्ष्मणंनत्वास्मितपूर्वाभिभाषिणी याहिदेवरभद्रंतेसाधुस्त्वंभक्तवत्सलः ४२ किमर्थंकोपमाकार्षी
र्भक्तेभृत्येकपीश्वरे बहुकालमनाश्वासंदुःखमेवानुभूतवान् ४३ इदानींबहुदुःखौघाद्वद्भिरभिरक्षितः
भवत्प्रसादात्सुग्रीवःप्राप्तसौख्योमहामतिः ४४ कामासक्तोरघुपतेःसेवार्थंनागतोहरिः आगमिष्यंतिहरयो
नानादेशगताःप्रभो ४५ प्रेषितादशसाहस्राहरयोरघुनंदन आनेतुंवानरान्दिग्भ्योमहापर्वतसन्निभान्
४६

र्षीः अतिशयेनकृतवान् अनाश्वासंनिरंतरमित्यर्थः ४३ बहुदुःखौघात् वालितःप्राप्यमाणात् ४४ यतःप्राप्तसौख्योऽतःकामासक्तोपि
सेवार्थंनागतइतिन अपितुआगतएवकाकुरत्रकथमागतस्तत्राह आगमिष्यंतीति ४५ एवंनैवमुद्यमकरणात् सेवांकृतवानेवेतिभावः ४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४७रामष्मात्तृत्वात्त्वयैवसहितोवानरपुंगवोऽद्यैवगंतारामसमीपमितिशेषः अंतर्भवनस्यमध्ये ४८ तेसहैवनयस्वेनैवसहनयेत्यर्थःना
रावचनेनातिमधुरेणललितेनकृशक्रोधः ४९ यत्रसुग्रीवःस्थितस्तदंतःपुरंजगाम ५०अत्यर्थंअतिशयेनातिभीतवदुत्सपातपर्यंकादि

सुग्रीवःस्वयमागत्यसर्ववानरयूथपैः वधयिष्यतिवैदेहीघातान्रावणंचहनिष्यति ४७त्वयैवसहितोद्यैवगंतावानरपुंगवः
पश्यांतर्भवनंतत्रपुत्रदारसुहृद्वृतम् ४८ दृष्ट्वासुग्रीवमभयंदत्वानयसहैवते तारायावचनंश्रुत्वाकृशक्रोधोयल
क्ष्मणः ४९ जगामांतःपुरंयत्रसुग्रीवोवानरेश्वरः रुमामालिंग्यसुग्रीवः पर्यंकेपर्यवस्थितः ५० दृष्ट्वालक्ष्मणम
त्यर्थमुत्सपातातिभीतवत् तंदृष्ट्वालक्ष्मणःक्रुद्धोमदविह्वलितेक्षणम् ५१ सुग्रीवंप्राहदुर्वृत्तविस्मृतोऽसिरघूत्त
मम् वालीयेनहतोवीरःसबाणोद्यप्रतीक्षते ५२ त्वमेववालिनोमार्गंगमिष्यसिमयाहतः एवमत्यंतपरुषंव-
दंतंलक्ष्मणंतदा ५३ उवाचहनुमान्वीरः कथमेवंप्रभाषसे त्वत्तोऽधिकतरोरामे भक्तोऽयंवानराधिपः ५४
रामकार्यार्थमनिशंजागर्तिनतुविस्मृतः आगताःपरितःपश्यवानराःकोटिशःप्रभो ५५ गमिष्यंत्यचिरेणै
वसीतायाःपरिमार्गणम् साधयिष्यतिसुग्रीवोरामकार्यमशेषतः ५६ श्रुत्वाहनूमतोवाक्यंसौमित्रिर्लज्जि
तोभवत् सुग्रीवोप्यर्घ्यपाद्याद्यैर्लक्ष्मणंसंप्रपूजयत् ५७ आलिंग्यप्राहरामस्यदासोऽहंतेनरक्षितः रामःस्वतेजसा
लोकान्क्षणार्द्धेनैवजेष्यति ५८

विशेषः मदविह्वलितेक्षणंमदविकलितनेत्रम् ५१प्रतीक्षतेत्वांहंतुमितिशेषः ५२ ५३ ५४ जागर्तिउ
द्यमवान्भवति अस्मिन्नेवसमयेआकारणार्थंगताःवानराःसेनांकर्षंतआगताइत्याह आगताइति ५५परिमार्गणंकर्तुमितिशेषः ५६ ५७ ५८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सहायमात्रमेवाहं वानरैःसहितःप्रभो सौमित्रिरपिसुग्रीवंप्राहकिंचिन्मयोदितम् ५९ तत्क्षमस्वमहाभाग
प्रणयाद्भाषितंमया गच्छामोऽद्यैवसुग्रीवरामस्तिष्ठतिकानने ६० एकएवातिदुःखार्तोजानकीविरहात्प्रभुः
तथेतिरथमारुह्यलक्ष्मणेनसमन्वितः ६१ वानरैःसहितोराजाराममेवान्वपद्यत ६२ भेरीमृदंगैर्बहुऋक्षवानरैः
श्वेतातपत्रैर्व्यजनैश्चशोभितः नीलांगदाद्यैर्हनुमत्प्रधानैःसमावृतोराघवमभ्यगाद्धरिः ६३ इतिश्रीमदध्या
त्मरा॰ उमामहेश्वरसंवादे॰ पंचमःसर्गः ५ श्रीमहादेवउवाच दृष्ट्वारामंसमासीनंगुहाद्वारिशिलातले
चैलाजिनधरंश्यामंजटामौलिविराजितम् १ विशालनयनंशांतंस्मितचारुमुखांबुजम् सीताविरहसंतप्त
श्यंतंमृगपक्षिणः २ रथाद्दूरात्समुत्पत्यवेगात्सुग्रीवलक्ष्मणौ रामस्यपादयोरग्रेपेततुर्भक्तिसंयुतौ ३ रामःसुग्रीव
मालिंग्यपृष्ट्वानामयमंतिके स्थापयित्वायथान्यायंपूजयामासधर्मवित् ४ ततोऽब्रवीद्रघुश्रेष्ठंसुग्रीवोभक्तिनम्रधीः
देवपश्यसमायातीवानराणांमहाचमूम् ५ कुलाचलादिसंभूतामेरुमंदरसन्निभाः नानाद्वीपसरिच्छैलवासिनः
पर्वतोपमाः ६ असंख्याताःसमायांतिहरयःकामरूपिणः सर्वेदेवांशसंभूताःसर्वेयुद्धविशारदाः ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अमितबलाइतिछेदः ८ ९ १० ११ कोटिभल्लूकद्वंदपः कोटीतिवृंदविशेषणम् १२ १३ १४ १५ प्रत्येकतः सार्वविभक्तिकस्तसिः ए

अत्रके चिद्गजबलाः केचिद्दशगजोपमाः गजायुतबलाः केचिदन्येऽमितबलाः प्रभो ८ केचिदंजनकूटाभाः केचित्कनकसन्निभाः केचिद्रक्तांतवदनादीर्घवालास्तथापरे ९ शुद्धस्फटिकसंकाशाः केचिद्राक्षससन्निभाः गर्जंतः परितोयांतिवानरायुद्धकांक्षिणः १० त्वदाज्ञाकारिणः सर्वे फलमूलाशनाः प्रभो ऋक्षाणामधिपोवीरो जांबवान्नामबुद्धिमान् ११ एषमेमंत्रिणांश्रेष्ठः कोटिभल्लूकद्वंदपः हनूमानेषविख्यातोमहासत्वपराक्रमः १२ वायुपुत्रोतितेजस्वीमंत्रीबुद्धिमतांवरः नलोनीलश्चगवयोगवाक्षोगंधमादनः १३ शरभोमैंदश्चैवगजः पनसएवच बलीमुखोदधिमुखः सुषेणस्तारएवच १४ केसरीचमहासत्वः पिताहनुमतोबली एतेमेयूथपाराम प्राधान्येनमयोदिताः १५ महात्मानोमहावीर्याः शक्रतुल्यपराक्रमाः एतेप्रत्येकतः कोटिकोटिवानरयूथपाः १६ तवाज्ञाकारिणः सर्वे सर्वेदेवांशसंभवाः एषवालिसुतः श्रीमानंगदोनामविश्रुतः १७ वालितुल्यबलोवीरोराक्षसानांबलांतकः एतेचान्येचबहवस्त्वदर्थेत्यक्तजीविताः १८ योद्धारः पर्वताग्रैश्चनिपुणाः शत्रुघातने आज्ञापयरघुश्रेष्ठसर्वेतेवशवर्तिनः १९ रामः सुग्रीवमालिंग्यहर्षपूर्णाश्रुलोचनः प्राहसुग्रीवजानासिसर्वंत्वंकार्यगौरवम् २० मार्गणार्थंहिजानक्यानियुंक्ष्वयदिरोचते श्रुत्वारामस्यवचनंसुग्रीवः प्रीतमानसः २१

कैकइत्यर्थः १६ १७ १८ १९ कार्यगौरवंजानासिअतोयस्यांदिशियेयोग्याः तांस्तत्रनियुंक्ष्वेत्यर्थः २० २१ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अत्यर्थमतिशयेनमहाबलान् ज्ञात्वाप्रयत्नेनतानेवप्रेषयामासेत्यन्वयः तानेवाह युवराजमिति २३ २४ मच्छासनपुरःसराः मच्छासनं पुरःसरमग्रेयेषांताहशाः अनेनमच्छासनंनविस्मर्तव्यमितिसूचितम् २५ प्राणांतिकंप्राणांतसंबंधिनंतत्संपादकमितियावत् अध्या

प्रेषयामासबलिनोवानरान्वानरर्षभः दिक्षुसर्वासुविविधान्वानरान्प्रेष्यसत्वरम् २२ दक्षिणांदिशमत्यर्थं प्रयत्नेनमहाबलान् युवराजंजांबवंतंहनूमंतमहाबलम् २३ नलंसुषेणंशरभंमैंदंद्विविदमेवच प्रेषयामास सुग्रीवोवचनंचेदमब्रवीत् २४ विचिन्वंतुप्रयत्नेनभवंतोजानकींशुभाम् मासादर्वाङ्निवर्तध्वंमच्छासनपुरःसराः २५ सीतामदृष्ट्वायदिवोमासादूर्ध्वंदिनंभवेत् तदाप्राणांतिकंदंडंमत्तःप्राप्स्यथवानराः २६ इतिप्रस्थाप्यसुग्रीवोवानरान्भीमविक्रमान् रामस्यपार्श्वेश्रीरामंनत्वाचोपविवेशसः २७ गच्छंतंमारुतिंदृष्ट्वारामोवचनमब्रवीत् अभिज्ञानार्थमेतन्मेह्यंगुलीयकमुत्तमम् २८ मन्नामाक्षरसंयुक्तंसीतायैदीयतांरहः अस्मिन्कार्येप्रमाणंहित्वमेवकपिसत्तम जानामिसत्वंतेसर्वंगच्छपंथाःशुभस्तव २९ एवंकपीनांराज्ञातेविसृष्टाःपरिमार्गणे सीतायाअंगदमुखाबभ्रमुस्तत्रतत्रह ३० भ्रमंतोविंध्यगहनेददृशुःपर्वतोपमम् राक्षसंभीषणाकारंभक्षयंतं मृगान्गजान् ३१ रावणोऽयमितिज्ञात्वाकेचिद्वानरपुंगवाः जघ्नुःकिलकिलाशब्दंमुंचंतोमुष्टिभिःक्षणात् ३२

त्मादित्यादङ् २६ श्रीरामंनत्वातत्पार्श्वेउपविवेशेत्यन्वयः २७ मेममांगुलीयकंगृहाणेतिशेषः हिःपादपूरणे २८ ननुअंगदादीन्विहायमह्यमेवकिमर्थंदीयतेतत्राह अस्मिन्नितिसत्वंबलंबुद्धिंच २९ परिमार्गणेतन्निमित्तमित्यर्थः ३० ३१ किलकिलाशब्दंमुंचंतोमुष्टिभिःक्षणाज्जघ्नुःराक्षसमितिशेषः ३२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायमिति सूकरवधत्वादिति भावः ३३ शुष्कंकंठोष्ठतालुकंयेषांते ३४ ततः गह्वरात् ३५ उत्सुकाः जलविषयोत्कंठावंतः इत्यर्थः परस्परं
बाहुभिर्बाहून् धृत्वा ...वैह नूमंतमन्वयुः अत्यंधकारादेवंकरिणम् ३६ महद्दूरं बहुदूरमित्यर्थः मणिनिभतोयान् मणितुल्यनिर्मलजलान्

नायंरावणइत्युक्त्वाययुरन्यन्महद्वनम् तृषार्ताः सलिलंतत्रनाविंदन्हरिपुंगवाः ३३ विभ्रमंतोमहारण्येशुष्क
कंठोष्ठतालुकाः ददृशुर्गह्वरंतत्रतृणगुल्मावृतंमहत् ३४ आर्द्रपक्षान्क्रौंचहंसान्निसृतान्ददृशुस्ततः अत्रा
स्तेसलिलंनूनंप्रविशामोमहागुहाम् ३५ इत्युक्त्वाहनुमानग्रेप्रविवेशातमन्वयुः सर्वेपरस्परंधृत्वाबाहून्बाहुभि
रुत्सुकाः ३६ अंधकारेमहद्दूरंगत्वापश्यन्कपीश्वराः जलाशयान्मणिनिभतोयान्कल्पद्रुमोपमान् ३७ वृक्षान्
पक्वफलैर्नम्रान्मधुद्रोणसमन्वितान् गृहान्सर्वगुणोपेतान्मणिवस्त्रादिपूरितान् ३८ दिव्यभक्षान्नसहितान्
मानुषैःपरिवर्जितान् विस्मितास्तत्रभवनेदिव्येकनकविष्टरे ३९ प्रभयादीप्यमानांतुददृशुःस्त्रियमेकलाम् ध्या
यंतींचीरवसनांयोगिनींयोगमास्थिताम् ४० प्रणेमुस्तांमहाभागांभक्त्याभीत्याचवानराः दृष्ट्वातान्वानरान्दे
वीप्राहयूयंकिमागताः ४१ कुतोवाकस्यदूतावामत्स्थानंकिंप्रधर्षथ तच्छ्रुत्वाहनुमानाहशृणुवक्ष्यामिदेविते ४२

कल्पद्रुमोपमानितिउत्तरान्वयि ३७ मधुद्रोणसमन्वितान् द्रोणपरिमितमधुयुतान् गृहान् गृहाणि अर्द्धर्चादि ३८ अतएवविस्मि-
तालब्धाश्चर्याः ३९ योगमास्थिताम् चित्तवृत्तिनिरोधजसिद्धिंप्राप्ताम् ४० भक्तिःप्रीतिर्योगिनीविषयेकिंकिमर्थमागताः ४१ कुत-
आगताइतिशेषः मत्स्थानंकिंप्रधर्षथ किमितिबलात्प्रविष्टाः ४२ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयोध्याधिपतिःश्रीमान्राजाऽदशरथःप्रभुः तस्यपुत्रोमहाभागोज्येष्ठोरामइतिश्रुतः ४३ पितुराज्ञांपुर-
स्कृत्यसभार्यःसानुजोवनम् गतस्तत्रहृताभार्यातस्यसाध्वीदुरात्मना ४४ रावणेनततोरामः सुग्रीवंसानुजोयथौ स्नु
ग्रीवोमित्रभावेनरामस्यप्रियवल्लभाम् ४५ मृगयध्वमितिप्राहततोवयमुपागताः ततोवनंविचिन्वंतोजानकींज
लकांक्षिणः ४६ प्रविष्टागव्हरंघोरंदैवाद्दत्रसमागताः त्वंवाकिमर्थमत्रासिकावात्वंवदनःशुभे ४७ योगिनीच
तथाहस्वावानरान्प्राहहृष्टधीः यथेष्टंफलमूलानिजग्ध्वापीत्वामृतंपयः ४८ आगच्छततोवक्ष्येममवृत्तांत
मादितः तथेतिभुक्त्वापीत्वाचहृष्टास्तेसर्ववानराः ४९ देव्याःसमीपंगत्वातेबद्धांजलिपुटाःस्थिताः ततःप्राहह
नूमंतंयोगिनीदिव्यदर्शना ५० हेमानामपुरादिव्यरूपिणीविश्वकर्मणः पुत्रीमहेशंनृत्येनतोषयामासभामिनी ५१
तुष्टोमहेशःप्रददाविदंदिव्यपुरंमहत् अत्रस्थितासासुदतीवर्षाणामयुतायुतम् ५२ तस्याअहंसखीविष्णुतत्प
रामोक्षकांक्षिणी नाम्नास्वयंप्रभादिव्यगंधर्वतनयापुरा ५३ गच्छंतीब्रह्मलोकंसामामाहेदंतपश्चर अत्रैवनिवसं
तीत्वंसर्वप्राणिविवर्जिते ५४ त्रेतायुगेदाशरथिर्भूत्वानारायणोव्ययः भूभारहरणार्थायविचरिष्यतिकानने ५५
मार्गंतोवानरास्तस्यभार्यामायांतितेगुहाम् पूजयित्वाथतान्गत्वारामंस्तुत्वाप्रयत्नतः ५६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यातासिलुप्तिरूपंइतः पूर्वीक्तहेमानियोगात् अस्माद्देशाच्च ५७ वेगात् वेगादिवक्षणेनैवेत्यर्थः पूर्वंस्थितंवनंगताः ५८ ५९ रोमांचित
तनूरुहाजातरोमांचतनूरुहा ६० ६१ मायायाः परतः स्थितंतदनधीनम् ६२ विवर्तोपादानतयांतर्यामितयाच सर्वभूतानांबहिरंतरम
वस्थितमपितैरलक्ष्यम् जवनिकानटानांवेषग्रहणस्थानावरणंपटनिर्मितंनटाश्चतत्रप्रविष्टास्तयाच्छन्नाभवंति तद्वद्योगमाययालंछ

यातासिभवनंविष्णोर्योगिगम्यंसनातनम् इतोऽहंगंतुमिच्छामिरामंद्रष्टुंत्वरान्विता ५७ यूयंनिदध्वमक्षी
णिगमिष्यथबहिर्गुहाम् तथैवचक्रुस्तेवेगाद्गताःपूर्वस्थितवनम् ५८ सापित्यक्त्वागुहांशीघ्रंययौराघवसन्निधिं
तत्ररामंससुग्रीवंलक्ष्मणंचददर्शह ५९ कृत्वाप्रदक्षिणंरामंप्रणम्यबहुशःसुधीः आहगद्गदयावाचारोमांचिततनूरुहा
६० दासीतवाहंराजेंद्रदर्शनार्थमिहागता बहुवर्षसहस्राणितप्तंमेदुश्चरंतपः ६१ गुहायांदर्शनार्थंतेफलितंमेद्यतत्तपः
अद्यहित्वानमस्यामिमायायाःपरतःस्थितम् ६२ सर्वभूतेषुचालक्ष्यंबहिरंतरवस्थितम् योगमायाजवनिकाछन्नोमा
नुषविग्रहः ६३ नलक्ष्यसेज्ञानदृशांशैलूषइवरूपधृक् महाभागवतानांत्वंभक्तियोगविधित्सया ६४

न्नोगुप्तः छन्नः सन् अज्ञानदृशांतैरित्यर्थः ६३ नलक्ष्यसेरूपधृक् तत्तद्रामादिरूपधृक् शैलूषोनटइव सयदारामादिवेषंकृत्वारामाद्यनुक
रणंकरोति तदारामइत्येवगृह्यते नतुपूर्वदृष्टोऽपितद्रूपेणतद्वत् ६४

भागवतानांभगवद्भक्तीच्छावतांएवंभूतेरूपेभक्तिरूपोयोगस्तद्वांच्छयात्वमवतीर्णोऽसितादृशंत्वांस्थूलशरीरत्वात् तामसीअहंकथंजानामि अ
योग्यतासत्वेपितज्ज्ञानापेक्षामेनास्तीत्याह लोकइति तवतत्त्वंचिदानंदादिरूपम् ६५ स्वापेक्ष्यमर्थमाह ममैतदितिमोक्षदर्शनंमोक्षोपा-
यदर्शकंपादयुगलंतेत्वयादर्शितम् अतोन्याकांक्षामेनास्तीत्यर्थः ६६ तदेवविशिनष्टि अदर्शनमिति भवार्णानांभवार्णवानामित्यर्थः व
र्णलोपआर्षः सन्मार्गस्तत्वज्ञानोपायः धनादिगर्वगर्वितोजनः अकिंचनानांत्यक्तसर्वविषयाणांधनभूतंदरिद्रस्यधनमिवेच्छाविषयं

अवतीर्णोसिभगवन्कथंजानामितामसी लोकोजानातितेयःकश्चित्तवतत्वंरघूत्तम ६५ ममैतदेवरूपंतेसदा
भातुहृदालये रामतेपादयुगलंदर्शितंमोक्षदर्शनम् ६६ अदर्शनंभवार्णानांसन्मार्गपरिदर्शनम् धनपुत्रक
लत्रादिविभूतिपरिदर्पितः अकिंचनधनंत्वाद्यनाभिधातुंजनोर्हति ६७ निवृत्तगुणमार्गायनिष्किंचनधनाय
ते ६८ नमःस्वात्माभिरामायनिर्गुणायगुणात्मने कालरूपिणमीशानमादिमध्यांतवर्जितम् ६९ समंचरं
तंसर्वत्रमन्येत्वांपुरुषंपरम् देवतेचेष्टितंकश्चिन्नवेदनृविडंबनम् ७०

त्वांअभिधातुंवार्तालापंकर्तुंचनार्हति तथा
पित्वोमीतिशेषः ६७ निवृत्तोगुणमार्गः प्रवृत्तिमार्गरूपःसंसारः स्वतएवयस्मात्तस्मै ६८ स्वात्मन्येवचिदानंदरूपेऽभिरमतेत
स्मैअतएवनिर्गुणाय गुणानांविषयाणामपिविवर्तोपादानत्वात्तदात्मनेकालरूपिणंतेनसर्वसंहर्तृत्वं ईशानत्वेनजगत्स्रष्टृत्वंतत्सालक-
त्वेउक्तेसर्वस्रष्टृत्वादेवतस्यादिमध्यांतवर्जितत्वं मध्यस्याद्यंतसापेक्षत्वात्तस्याप्यभावः ६९ समंचरंतंअंतर्यामितयेत्यर्थः नृविडंबनं
मनुष्यव्यवहारानुकरणरूपम् अनुकरणमेतदिति कश्चिन्नवेद ७० ७ ७ ७ २२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समत्वादेवाह नतेइत्यादिपरोभिन्नःसर्वरूपत्वात्तवेतिभावः यद्वादथितद्वेष्याभ्यांपरउदासीनः तथाविधंशत्रुमित्रोदासीनवंतंयथाराव
णःशत्रुर्बिभीषणोमित्रंअन्येउदासीनाइति ७१ अजस्यसर्वकारणत्वात्स्वकारणहीनस्य अकर्त्तुः कर्तृत्वादिधर्महीनस्य अपरिणामित्वादितिभा
वः ईशस्यसन्निधानमात्रेणसर्वनियंतुः तिर्यङ्नरादिषु तिर्यंचोमत्स्यादयः तेषुमनुष्येषुचयज्जन्मकर्मादितदत्यंतविडंबनंअनुकरणंतत्तज्जाते
रितिशेषःनतुवास्तवमितिभावः ७२ तत्रप्रकृतावतारप्रयोजनमाह त्वामिति अक्षरमपिलोकानांस्वकथाश्रवणसिद्धिप्रासयेजातमाहुः केचित्को

नतेस्तिकश्चि द्दयितोद्वेष्योवापरएवच त्वन्मायापिहितात्मानस्त्वांपश्यंतितथाविधम् ७१ अजस्याकर्तुरीश
स्यदेवतिर्यङ्नरादिषु जन्मकर्मादिकंयद्यत्तदत्यंतविडंबनम् ७२ त्वामाहुरक्षरंजातंकथाश्रवणसिद्धये
केचित्कोसलराजस्यतपसःफलसिद्धये ७३ कौसल्ययाभ्यर्थमानंजातमाहुःपरेजनाः दुष्टराक्षससंभूभार
हरणायार्थितोविभुः ७४ ब्रह्मणानररूपेणजातोऽयमितिकेचन शृण्वंतिगायंतिचयेकथास्तेरघुनंदन ७५
पश्यंतितवपादाब्जंभवार्णवसुतारणम् त्वन्मायागुणबद्धाहंव्यतिरिक्तंगुणाश्रयम् ७६

सलराजस्य ७३ ब्रह्मणाप्रार्थितोनररूपेणजातइत्यन्वयः ७४ आद्यप्रयोजनस्यैवमुख्यत्वंप्रतिपादयितुं तच्छ्रवणादिजांसिद्धिमाह
शृण्वंतीत्यादिना ७५ पश्यंतीतितेत्वत्पादाब्जंपश्यंतीत्यन्वयः त्वत्पादाब्जदर्शनमेव तच्छ्रवणजामुख्यासिद्धिरित्यर्थः त्वत्पादाब्ज श
ब्देनमुख्यंचिदानंदात्मकंतत्स्वरूपमेवविवक्षितमित्याह त्वन्मायेति त्वन्मायागुणैः सत्वरजस्तमोभिर्बद्धायेऽहंमः अहंकार वि
शिष्टास्तेभ्योव्यतिरिक्तं तद्दोषास्पृष्टंगुणानामाश्रयंप्रवर्तकंयद्रूपंतद्दर्शनमेवतज्जन्यासिद्धिरित्यर्थः ७६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अविषयंवाङ्मनोविषयंत्वांस्तोतुंचकथंजानीयांप्रवृत्ताभवेयंतज्ज्ञानंदुर्लभमेवस्तोतुमपिनसामर्थ्यमितिभावः एवंचस्तुतेरशक्यत्वात्केवलंप्रणा
ममेवकरोमीत्याह नमस्यामीति ७७ प्रसन्नः सन्प्रणतानामघस्यपापस्यहर्ता ७८ निश्चलांभक्तिंदेहीत्यन्वयः प्राकृतेषु त्वद्भक्तिही
नेषु संसारसक्तेष्वितियावत् ८० मेमानसंवक्ष्यमाणगुणविशिष्टरूपंस्मरतु पीतवाससंभ्रांतमितिपुंस्त्वमार्षम् ८१ ८२ बद

कथंत्वांदेवजानीयांस्तोतुंवाविषयंविभुम् नमस्यामिरघुश्रेष्ठंबाणासनशरान्वितम् लक्ष्मणेनसहभ्रात्रासु
ग्रीवादिभिरन्वितम् ७७ एवंस्तुतोरघुश्रेष्ठःप्रसन्नःप्रणताघहृत् उवाचयोगिनींभक्तांकिंतेमनसिकांक्षितम्
७८ साप्राहराघवंभक्त्याभक्तिंतेभक्तवत्सल यत्रकुत्रापिजातायानिश्चलांदेहिमेप्रभो ७९ त्वद्भक्तेषुसदासंगो
भूयान्मेप्राकृतेषुन जिह्वामेरामरामेतिभक्त्यावदतुसर्वदा ८० मानसंश्यामलंरूपंसीतालक्ष्मणसंयुतम् धनुर्बा
णधरंपीतवाससंमुकुटोज्ज्वलम् ८१ अंगदैर्नूपुरैर्मुक्ताहारैःकौस्तुभकुंडलैः भांतंस्मरतुमेरामवरंनान्यंवृणेप्रभो
८२ श्रीरामउवाच भवत्वेवंमहाभागेगच्छत्वंबदरीवनम् तत्रैवमांस्मरंतीत्वंत्यक्त्वेदंभूतपंचकम् मामेवपर
मात्मानमचिरात्प्रतिपद्यसे ८३ श्रुत्वारघूत्तमवचोऽमृतसारकल्पंगत्वातदेवबदरीतरुखंडजुष्टम् तीर्थंत
दारघुपतिंमनसास्मरंतीत्यक्त्वाकलेवरमवापपरंपदंसा ८४ इतिश्रीमदध्यात्म॰उमामहे॰षष्ठःसर्गः ६

रीवनंबदरिकाश्रमंइदंभूतपंचकंभूतपंचकात्मकमिमंदेहमित्यर्थः ८३ परमात्मानंमांप्रतिपद्यसेवर्तमानसामीप्येलट् अनेनस्वसायुज्यरूपा २३
मुक्तिःतपःपूर्वकंतच्चदेहत्यागेनदर्शिता तरुखंडंतरुसमूहः ८४ इतिश्रीमत्सक॰ अध्यात्मरामाय॰किष्किंधाकांडेषष्ठः सर्गः ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथतत्रेति विमुह्यंतः सीतालाभाभावादितिशेषः सीतामार्गणेनतत्रश्रमसक्लेशेनकर्शिताः कृशत्वंमासाः १ मासोगतः सुग्रीवाज्ञसकालाद-
धिकः कालोगतइत्यर्थः २ राजशासनंमासांतः सीतान्वेषणरूपम् ३ मिषात् रामकार्याकरणरूपात् ४ तदेवाह इदानीमिति ५ नन्वेवमहं

श्रीमहादेवउवाच अथतत्रसमासीनावृक्षखंडेषुवानराः चिंतयंतोविमुह्यंतः सीतामार्गणकर्शिताः १ तत्रोवा
चांगदः कांश्चिद्वानरान्वानरर्षभः भ्रमतागव्हरेस्माकंमासोनूनंगतोभवत् २ सीतानाधिगतास्माभिर्नकृतंरा
जशासनम् यदिगच्छामकिष्किंधांसुग्रीवोऽस्मान्हनिष्यति ३ विशेषतः शत्रुसुतंमांमिषान्निहनिष्यति म
यितस्यकुतः प्रीतिरहंरामेणरक्षितः ४ इदानींरामकार्यंमेनकृतंतन्मिषंभवेत् तस्यमद्धननेनूनंसुग्रीव-
स्यदुरात्मनः ५ मातृकल्पांभ्रातृभार्यांपापात्माअनुभवत्यसौ नगच्छेयमतः पार्श्वंतस्यवानरपुंगवाः ६ त्यक्ष्या
म्जिविवितंचात्रयेनकेनापिमृत्युना इत्यश्रुनयनंवीक्ष्यावानरपुंगवाः ७ व्यथिताः साश्रुनयनायुवराजमथाब्रु
वन् ८ किमर्थंतवशोकोत्रवयंतेप्राणरक्षकाः भवामोनिवसामोऽत्रगुहायांभयवर्जिताः ९ सर्वसौभाग्यसहि
तंपुरंदेवपुरोपमम् शनैः परस्परंवाक्यंवदतांमारुतात्मजः १०

त्यंत्वद्वधरूपंसुग्रीवः कथंकुर्यात्तत्राह मातृकल्पामिति ज्येष्ठ-
भ्रातृपत्नीत्वात् तस्यकार्यविचारोनेतिभावः एषोक्तिर्बालभावेनमृतेभर्तरि त्रैवर्णिकव्यतिरिक्तस्त्रियाअन्योपगमस्यादूषणात् ६ येनकेनापिउद्बंधनादिप्रकारेण ७ ८ वयंतेप्राणरक्षकाभवामः तदुपायमाहुः अत्रगुहायांवसामइति ९ शनैः परस्परमेवंवदतांवाक्यंशुश्रावेत्यन्वयः १०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किमर्थंविचार्यते सुग्रीवतोवधादिकमितिशेषः अयमितरवानरोक्तोदुर्विचारोगुहावासरूपस्तुसर्वथानयुज्यते ११ तत्रसुग्रीवतोभयंवा
रयति राज्ञइति तारापुत्रइत्यनेननतारायामतिप्रीतेस्त्वयिनतथाव्यवहारसंभावनापीतिभावः रामादपिनभयमित्याह रामस्येति १२ सी
तात्लाभोपिभाव्येवेत्याह अहमिति अतोहेवत्सान्यंविचारंनविचारय १३ वानरीयांगुहावासोकिंदूषयति गुहेतिनिर्भेद्योऽभेद्यःतदेत

श्रुत्वांगदंसमालिंग्यशोवाचनयकोविदः विचार्यतेकिमर्थंतेदुर्विचारोनयुज्यते ११ राज्ञोऽत्यंतप्रियस्त्वंहितारा
पुत्रोऽतिवल्लभः रामस्यलक्ष्मणात्प्रीतिस्त्वयिनित्यंप्रवर्द्धते १२ अतोनराघवाद्भीतिस्तवराज्ञोविशेषतः
अहंतवहितेसक्तोवत्सनान्यंविचारय १३ गुहावासश्चनिर्भेद्यइत्युक्तंवानरैस्तुयत् तदेतद्रामबाणानाम
भेद्यंकिंजगत्त्रये १४ येत्वांदुर्बोधयंत्येतेवानरावानरर्षभ पुत्रदारादिकंत्यक्त्वाकथंस्थास्यंतितेत्वया १५ अन्य
द्गुह्यतमंवक्ष्येरहस्यंशृणुमेसुत १६ सीताभगवतीमायाजनसंमोहकारिणी लक्ष्मणोभुवनाधारःसाक्षाच्छे
षःफणीश्वरः १७ ब्रह्मणाप्रार्थिताःसर्वेरक्षोगणविनाशने मायामानुषभावेनजातालोकैकरक्षकाः १८ व
यंचपार्षदाःसर्वेविष्णोर्वैकुंठवासिनः मनुष्यभावमापन्नेस्वेच्छयापरमात्मनि १९

त् अयुक्तमितिशेषः यतोजगत्त्रयेरामबाणानामभेद्यंकिंनकिमपीत्यर्थः तेनात्रवासेमहद्रामभयमितिभावः १४ यदेतैर्वानरैरुक्तं
वयंतेप्राणरक्षकाइति तदपिमिथ्येत्याह येत्वामिति १५ १६ १७ रक्षोगणविनाशने तन्निमित्तंप्रार्थिताइत्यन्वयः माया
मानुषभावेनेति नतेषांवास्तवंमनुष्यत्वं किंतुमाययैवेतिभावः १८ १९ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नन्वेवंवानररूप मस्माकंकिमर्थंतत्राह तस्यैवमाययेति २० २१ २२ दक्षिणांबुधेस्तीरेमहेंद्राख्यगिरेःपादंप्रत्यंतपर्वतमाश्रयुरित्यन्व
यः२३ भयवर्द्धनंदर्शनमात्रेणभयवृद्धिकरांकंकुर्मइतिवादिनः वादनशीलाः संतःउदधेस्तीरेनिषेदुरथमंत्रयामासुरित्यन्वयः २४ २५

वयंवानररूपेणजातास्तस्यैवमायया वयंतुतपसापूर्वमाराध्यजगतांपतिम् २० तेनैवानुगृहीताःस्मःपार्षदत्व
मुपागताः इदानीमपितस्यैवसेवांकुर्मस्तवमायया २१ पुनर्वैकुंठमासाद्यप्रकरवस्त्यामहेवयम् इत्यंगदमथा
श्वास्यगताविंध्यंमहाचलम् २२ विचिन्वंतोयशानकेजानकींदक्षिणांबुधेः तीरेमहेंद्राख्यगिरेःपवित्रंपादमा
ययुः २३ हत्वासमुद्रंदुःपारमगाधंभयवर्द्धनम् वानराभयसंत्रस्ताःकिंकुर्मइतिवादिनः २४ निषेदुरुदधेस्ती
रेसर्वेचिंतासमन्विताः मंत्रयामासुरन्योन्यमंगदाद्यामहाबलाः २५ भ्रमतामिवनोमासोगतोःनैवगुहांतरे
नदृष्टोरावणोवाद्यसीतावाजनकात्मजा २६ सुग्रीवस्तीक्ष्णदंडोस्मान्निहंत्येवनसंशयः सुग्रीववधतोस्माकं
श्रेयःप्रायोपवेशनम् २७ इतिनिश्चित्यतत्रैवदर्भानास्तीर्यसर्वतः उपाविविशुस्तेसर्वेमरणेकृतनिश्चयाः २८ ए
तस्मिन्नंतरेतत्रमहेंद्राद्रिगुहांतरात् निर्गत्यशनकैराणाद्गृध्रः पर्वतसन्निभः २९ हत्वाप्रायोपवेशनस्थितान्वान
रपुंगवान् उवाचशनकैर्गृध्रःप्राप्तोमक्षोःद्यमेबहुः ३० एकैकेशःक्रमात्सर्वान्भक्षयामिदिनेदिने श्रुत्वातद्गृध्रवच
नंवानराभीतमानसाः ३१

गुहांतरेगुहामध्येवाशब्दावप्यर्थौ २६ सुग्रीववधतःसुग्रीवात्प्राप्स्यमानवधतः प्रायोपवेशनंतत्साध्युपा
याभावेऽनशनेनमरणसंकल्पः २७ उपाविविशुरित्यत्रगुणआर्षः २८ २९ बहुःविपुलोबहुसंख्यश्च ३० ३१ ५ ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंचित् किंचिदपीत्यर्थः हरीश्वराइत्यंगदहनूमदादीन् संबोध्येतर वानर वाक्यम् ३२ सुग्रीवहितंजानकीसमाचारोक्त्यारामसंतोषरूपम्
आत्मनोहितंतथासुग्रीवसंतोषरूपं अनेनगृध्रेणवृथावधंनाशंप्राप्ताःप्रापिताः यमसादनंयमगृहंगच्छामः वर्तमानसामीप्येलट्

भक्षयिष्यतिनः सर्वानसौगृध्रोनसंशयः रामकार्यंचनास्माभिःकृतंकिंचिद्धरीश्वराः ३२ सुग्रीवस्यापिचहितं
नकृतंस्वात्मनामपि वृथानेनवधंप्राप्तागच्छामोयमसादनम् ३३ अहोजटायुर्धर्मात्मारामस्यार्थेमृतःसुधीः
मोक्षंप्रापदुरावापंयोगिनामप्यरिंदमः ३४ संपातिस्तुतदावाक्यंश्रुत्वावानरभाषितम् केवायूयंममभ्रातुःकर्णपीयू
षसन्निभम् ३५ जटायुरितिनाम्नाद्यव्याहरंतःपरस्परम् उच्यतांवोभयंमाभून्मत्तःप्लवगसत्तमाः ३६ तमुवाचांग
दःश्रीमानुत्थितोगृध्रसन्निधौ रामोदाशरथिःश्रीमान्लक्ष्मणेनसमन्वितः ३७ सीतयाभार्ययासार्धंविचचार
महावने तस्यसीताहृतासाध्वीरावणेनदुरात्मना ३८ मृगयांनिर्गतेरामेलक्ष्मणेचहृताबलात् रामरामेतिक्रोशंती
श्रुत्वागृध्रःप्रतापवान् ३९ जटायुर्नामपक्षींद्रोयुद्धंकृत्वासुदारुणम् रावणेनहतोवीरोराघवार्थंमहाबलः ४० रा
मेणदग्धोरामस्यसायुज्यमगमत्क्षणात् रामःसुग्रीवमासाद्यसख्यंकृत्वाग्निसाक्षिकम् ४१ सुग्रीवचोदितोहत्वावा
लिनंसुदुरासदम् राज्यंददौवानराणांसुग्रीवायमहाबलः ४२

३३ योगिनामपिदुरावापमित्यन्वयः दुराङ्अवपूर्वादाप्नोतेःख
लुषच्छार्षीशेषेवा ३४ कर्णपीयूषसन्निभंकर्णयोरमृततुल्यमित्यर्थः जटायुरितिनामेत्यनेनान्वयः ३५ यूयंकेतदुच्यतामित्यर्थः ३६ ३७
३८ लक्ष्मणेचनिर्गतइत्यनुकर्षः रामरामेतिक्रोशंतीहृतेत्यन्वयः श्रुत्वातत्क्रोशनंश्रुत्वेत्यर्थः ३९ ४० ४१ ४२ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिमार्गणे तन्निमित्तंविषयसप्तमीयं वानर वृंदान् तद्युक्तानस्मान् हनूमदाद्यपेक्षयाबहुवचनम् ४३गव्हरंगुहांप्रमंतइत्यस्यस्थि
ताइतिशेषः ४४ गतोमासइत्यस्यैवंप्रमतामित्यादि ४५ ४६ ४७ नयध्वंमांजलांतिकमित्युक्त्यामृगपक्ष्यादीनामपियथाज्ञानंधर्मा

सुग्रीवःप्रेषयामाससीतायाःपरिमार्गणे अस्मान्वानर वृंदान्वै महासत्वान्महाबलः ४३ मासाद्वर्वाङ्निवर्तध्वं
नोचेत्प्राणान्हरामिवः इत्याज्ञसाप्रमंतोस्मिन्वनेगव्हरमध्यगाः ४४ गतोमासोनजानीमःसीतांवारांवणंच
वा मर्तुंप्रायोपविष्टाःस्मस्तीरे लवणवारिधेः ४५ यदिजानासिहेपक्षिन्सीतांकथयनःशुभाम् अंगदस्यवचःश्रु
त्वासंपातिर्हृष्टमानसः ४६ उवाचमत्प्रियोभ्राताजटायुःप्लवगेश्वराः बहुवर्षसहस्रांते भ्रातृवार्ताश्रुतामया
४७ वाक्सहायंकरिष्येहं भवतांप्लवगेश्वराः भ्रातुःसलिलदानायनयध्वंमांजलांतिकम् ४८ पश्चात्सर्वंशुभं
वक्ष्येभवतांकार्यसिद्धये तथेतितेन्युस्तेतीरं समुद्रस्यविहंगमम् सोपितत्सलिलेस्नात्वाभ्रातुर्दत्वाजलांजलि
म् ४९ पुनःस्वस्थानमासाद्यस्थितोनीतोहरीश्वरैः संपातिःकथयामासवानरान्परिहर्षयन् ५० लंकानामनग
र्यस्तित्रिकूटगिरिमूर्द्धनि तत्राशोकवनेसीताराक्षसीभिःसुरक्षिता ५१ समुद्रमध्येसालंकाशतयोजनदूर-
तः दृश्यतेमेनसंदेहःसीताचपरिदृश्यते ५२

धिकारोस्तीतिसूचयति ४८ तत्सलिले समुद्रस्यजले हरीश्वरैर्नी
तःस्वस्थानंप्रापितइत्यर्थः ५० सुरक्षितास्तीतिशेषः ५१ समुद्रस्यमध्येइत्यनेनचतुर्दिक्षुसमुद्रपरिखमेव तद्द्वीपमितिसूचि
तम् लंकामेमयादृश्यतेसीताचदृश्यते ५२ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रहेतुमाह गृध्रत्वादिति नात्रसंशयितुंक्षमम् अत्रसंशयोनकार्यइत्यर्थः ५३ ५४ पक्षविवर्जितइत्यनेन बलातिशयेपिगमनशक्तिहीनत्वंसूचितम् ५५ ५६ इतिश्रीमत्सक० अध्या० किष्किंधाकांडेसप्तमःसर्गः ७ १ पक्षहीनत्वमस्यकुतइतिवानराणांजिज्ञासांज्ञात्वात

गृध्रत्वाद्दूरदृष्टिर्मेनात्रसंशयितुंक्षमम् शतयोजनविस्तीर्णंसमुद्रंयस्तुलंघयेत् ५३ सएवजानकींदृष्ट्वापुनरायास्यतिध्रुवम् अहमेवदुरात्मानंरावणंहंतुमुत्सहे ५४ भ्रातृहंतारमेकाकीकिंतुपक्षविवर्जितः यतध्वमतियत्नेनलंघितुंसरितांपतिम् ततोहंतारघुश्रेष्ठोरावणंराक्षसाधिपम् ५५ उल्लंघ्यसिंधुंशतयोजनायतंलंकांप्रविश्याथविदेहकन्यकाम् दृष्ट्वासमाभाष्यचवारिधिंपुनस्तर्तुंसमर्थःकृतमाविचार्यताम् ५६ इतिश्रीमदध्यात्मरामायणेउमामहेश्व० किष्किंधाकांडेसप्तमःसर्गः ७ श्रीमहादेवउवाच अथतेकौतुकाविष्टाःसंपातिंसर्ववानराः पप्रच्छुर्भगवन्ब्रूहिस्वमुदंतंत्वमादितः १ संपातिःकथयामासस्ववृत्तांतंपुराकृतम् अहंपुराजटायुश्चभ्रातरौरूढयौवनौ २ बलेनदर्पितावावांबलजिज्ञासयाखगौ सूर्यमंडलपर्यंतंगंतुमुत्पतितौमदात् ३ बहुयोजनसाहस्रंगतौतत्रप्रतापितः जटायुस्तंपरित्रातुंपक्षैराच्छाद्यमोहतः ४ स्थितोहंरश्मिभिर्दग्धपक्षोस्मिन्विंध्यमूर्द्धनि पतितोदूरपतनान्मूर्च्छितोहंकपीश्वराः ५

दुत्तरमाह संपातिरिति पुराकृतंस्ववृत्तांतंस्वशब्द आत्मात्मीयोभयवाची स्वस्यस्वभ्रातुश्चवृत्तांतम् तमेवाह अहमित्यादिरूढयौवनौयौवनमध्यमाप्तौ २ अतएवबलदर्पितौ ३ जटायुःप्रतापितःकनिष्ठत्वात्तन्मोहतः तंपरित्रातुंपक्षैराच्छाद्यस्थितोहंसूर्यरश्मिभिर्दग्धपक्षोत्रपतितोदूरपतनान्मूर्च्छितआसमितिशेषः ४ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनत्रयात्तदुत्तरं पुनः प्राणसहितो दग्धपक्षको यतोऽतो भ्रांतमानसो देशादीन्नजाने ६ ७ अद्यतेइदं रूपं किंकेन वा पूर्वं हृष्टं तदुत्तमं रूपं विरूपं कृतम् ८ पूर्वं बलवानसीति वर्तमानसामीप्ये लट् ९ दाववह्निना तत्तुल्यं चिंतयेत्यर्थः १० चिंतामभिनयति कथमिति ११ तत्र देहस्य तन्मूलस्य च तत्त्वज्ञानं विना छेत्तुमशक्यतया भोगैकनाश्यं दुःखमिति वक्तुमुपक्रमते देहेति १२ ननु कोसावहंपदार्थो यद्बुद्धिर्देहे तत्राह अहंकारइ

दिनत्रयात्पुनः प्राणसहितो दग्धपक्षकः देशं वा गिरिकूटान्वानजाने भ्रांतमानसः ६ शनैरुन्मील्य नयने हस्वात्राश्रमं शुभम् शनैः शनैराश्रमस्य समीपं गतवानहम् ७ चंद्रमानाम मुनिराट् हृष्ट्वा मां विस्मितो वदन् संपाते किमिदं ते द्य विरूपं केन वा कृतम् ८ जानामि त्वामहं पूर्वमत्यंतबलवानसि दग्धौ किमर्थं ते पक्षौ कथ्यतां यदि मन्यसे ९ ततः स्वचेष्टितं सर्वं कथयित्वाति दुःखितः अब्रुवं मुनिशार्दूलं दग्धोहं दाववह्निना १० कथं धारयितुं शक्तो विपक्षी-जीवितं प्रभो इत्युक्तोथ मुनिर्वीक्ष्य मां दयार्द्रविलोचनः ११ शृणु वत्स वचो मेद्य श्रुत्वा कुरु यथोचितम् देहमूलमिदं दुःखं देहः कर्मसमुद्भवः १२ कर्म प्रवर्तते देहेऽहंबुद्ध्या पुरुषस्य हि अहंकारस्त्वनादिः स्यादविद्यासंभवो जडः १३ चिच्छायया सदायुक्तस्तप्तायःपिंडवत्सदा तेन देहस्य तादात्म्याद्देहश्चेतनवान्भवेत् १४

नि अविद्याया जडत्वात्तत्संभवोसावपि जड इति भावः अविद्यासंभवत्वेपि संभवकालापरिच्छेदादनादिरित्युक्तः १३ तप्तायःपिंडो यथा वह्निना युक्तस्ततः पृथक्कर्तुमशक्यश्च तथाऽयमहंकारश्चित्त इत्यर्थः तेन चित्तादात्म्यापन्नाहंकारेण चेतनवान् चैतन्यवानिव १४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवमात्मनश्चैतनस्य अहंकृतेर्बलात् तत्संबंधबलात् अहंदेह इतिबुद्धिः तत्कृत एष संसारः सुखादिसाधकः कर्मद्वारेतिबोध्यम् १५ एवं निर्विकारस्यात्मनोऽहंकारादिभिर्मिथ्यातादात्म्यात् यद्वा ततोऽतिरिक्तोऽपिकर्मकर्ताहमितिसंकल्पपूर्वकंप्रायोदेहोऽहमितिबुद्धिरेव सर्वस्य कस्यचित्प्रागभवपुण्यवशात्तद्बुद्धिविलयेऽपिकर्मकर्तेतिबुद्धिरस्त्येवेतिभावः १६ कर्माणिकरोति अहंकरोमीतिसंकल्पादेवा वशस्तत्फलैः सुखादिभिर्बध्यते अनेनयोनाहंकर्तेतिभावयति तस्यनैवबंधइतिसूचितम् तद्बंधप्रकारमाह ऊर्ध्वेति पुण्येनो

देहोऽहमितिबुद्धिः स्यादात्मनोऽहंकृतेर्बलात् तन्मूलएषसंसारः सुखदुःखादिसाधकः १५ आत्मनोनिर्विकार-
स्यमिथ्यातादात्म्यतः सदा देहोऽहंकर्मकर्ताहमितिसंकल्प्यसर्वदा १६ जीवः करोतिकर्माणितत्फलैर्बध्यतेऽवशः
ऊर्ध्वाऽधोभ्रमतेनित्यंपापपुण्यात्मकः स्वयम् १७ कृतंमयाधिकंपुण्यंयज्ञदानादिनिश्चितम् स्वर्गंगत्वासुखंभोक्ष्ये
इतिसंकल्पवान्भवेत् १८ तथैवाध्यासतस्तत्रचिरंभुक्त्वासुखंमहत् क्षीणपुण्यः पतत्यर्वागनिच्छन्कर्म-
चोदितः १९ पतित्वामंडलेचेंदोस्ततोनीहारसंयुतः भूमौपतित्वाव्रीह्यादौ तत्रस्थित्वाचिरंपुनः २०

र्ध्वंपापेनाधोभ्रमतेइत्यर्थः १७ तदेवविवृणोति कृतमिति इतिसंकल्पवान्भवेत् स्वर्गतः सुखभोगीचेतिशेषः १८ तथैवाध्यासतः अहंब हुपुण्यकर्तेत्यध्यासेन तत्रस्वर्गेअनिच्छन्नपिपततीति अवशइत्युक्तस्यविवरणम् १९ ततः पातपूर्वकंयेनप्रकारेणगर्भेवासस्तदुपपादयति पतित्वेति इंदोर्मंडलेपतित्वाततोनीहारैस्तत्किरणद्वाराभूसंबद्धैरेवसंबद्धोभूत्वाभूमौपतति ततोव्रीह्यादौअनुशायित्वेनस्थित्वाचतुर्विधंभोज्यं भक्ष्यभोज्य लेह्यचोष्यरूपंतदन्यतमद्भूत्वापुरुषैर्भुज्यते ततोभोजनानंतरंरेतोभूत्वास्थितइतिशेषः ततस्तेनपुंसास्त्रीयोनौऋतुकालेसिंचितः सिक्तः आर्षत्वात्साधुः २०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२१ सिक्तः सजीवएकेनदिनेनजरायुपरिवेष्टितम् योनिरक्तेनसंयुक्तंकललंकललाख्यपरिणामवद्भूत्वारूढत्वंदार्ढ्यमाप्नुयात् जरायु गर्भवेष्टनम् २२ बुद्बुदाकारताम् तदाकारपरिणामविशेषम् एवमग्रेऽपि २३ रुधिरेणपरिप्लुताभवतीतिशेषः तस्याएवपेशीरूपपरिणा मस्यैवपंचविंशतिरात्रिषुगतास्वितिशेषः समासाभावोनित्यत्वात् २४ अंकुशानेवाह ग्रीवेत्यादिपंचधांगानिपंचधांगांकुराः मासतः मासे

भूत्वाचतुर्विधंभोज्यंपुरुषैर्भुज्यतेततः रेतोभूत्वापुनस्तेनकृतोस्त्रीयोनिसिंचितः २१ योनिरक्तेनसंयुक्तंजरायु परिवेष्टितम् दिनेनैकेनकललंभूत्वारूढत्वमाप्नुयात् २२ तत्पुनःपंचरात्रेणबुद्बुदाकारतामियात् सप्तरात्रेणत दपिमांसपेशित्वमाप्नुयात् २३ पक्षमात्रेणसापेशीरुधिरेणापरिप्लुता तस्याएवांकुरोत्पत्तिःपंचविंशतिरात्रिषु २४ ग्रीवाशिरश्चस्कंधश्चपृष्ठवंशस्तथोदरम् पंचधांगानिचैकैकंजायंतेमासतःक्रमात् २५ पाणिपादौतथापा र्श्वःकटिर्जानुतथैवच मासद्वयात्प्रजायंतेक्रमेणैवनचान्यथा २६ त्रिभिर्मासैःप्रजायंते अंगानांसंधयः क्रमात् सर्वांगुल्यःप्रजायंतेक्रमान्मासचतुष्टये २७ नासाकर्णौचनेत्रेचजायंतेपंचमासतः दंतपंक्तिर्न खास्तुल्यंपंचमेजायतेतथा २८ अर्वाक्षण्मासतश्छिद्रंकर्णयोर्भवतिस्फुटम् पायुर्मेढ्रमुपस्थंचनाभिश्चा पिभवेन्नृणाम् २९ सप्तमेमासिरोमाणिशिरःकेशास्तथैवच विभक्तावयवत्वंचसर्वंसंपद्यतेऽष्टमे ३०

तेत्यर्थः क्रमात् प्रथमंग्रीवेत्यादिक्रमेण २५ पाण्यादिष्वप्येवमेव २६, २७ पंचमासतः पंचमेमासि दंताद्यपिपंचमेएवमासि २८ २९ विभ क्तावयवत्वं पृथक्ज्ञानविषयावयवत्वं एतद्वक्ष्यमाणंच गर्भोपनिषदिवैद्यकसंहितासुशारीरकेचस्फुटंविस्तरभयान्नेहलिख्यते ३०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंएवंरीत्यावर्द्धतइत्यन्वयः चैतन्यंप्राप्नोति तदभिव्यक्तिंप्राप्नोतीत्यर्थः ३१ नाभीति नाभिसूत्रंनालाख्यंमातूरसनाड्यासंबद्धंतदीया
ल्परंध्रेणगर्भजठरंप्रास मातृभुक्तान्नसारतोगर्भगःपिंडोवर्द्धते अल्परंध्रप्राप्तास्याहारतोऽपिस्वकर्मतोनम्रियतनम्रियतेइत्यर्थः ३२
सर्वाणिजन्मानितत्कृतानिकर्माणिचस्मृत्वाजठरानलयोगात् अतिसंतप्तःवचनमाह ३३ नानेति पुत्रादिसंबंधमनुभूतवानितिसंबंधः

जठरेवर्द्धतेगर्भःस्त्रियाएवंविहंगम पंचमेमासिचैतन्यंजीवःप्राप्नोतिसर्वशः ३१ नाभिसूत्राल्परंध्रेणमातृभुक्ता
न्नसारतः वर्द्धतेगर्भगःपिंडोनम्रियेतस्वकर्मतः ३२ स्मृत्वासर्वाणिजन्मानिपूर्वकर्माणिसर्वशः जठरानलतप्तो
यमिदंवचनमब्रवीत् ३३ नानायोनिसहस्रेषुजायमानोनुभूतवान् पुत्रदारादिसंबंधंकोटिशःपशुबांधवान् ३४
कुटुंबभरणासक्त्यान्यायान्यायैर्धनार्जनम् कृतंनाकरवंविष्णुचिंतांस्वप्नेपिदुर्भगः ३५ इदानींतत्फलंभुंजेगर्भदुः
खंमहत्तरम् अशाश्वतेशाश्वतवद्देहेतृष्णासमन्वितः ३६ अकार्याण्येवकृतवान्नकृतंहितमात्मनः इत्येवंबहुधा
दुःखमनुभूयस्वकर्मतः ३७ कदानिष्क्रमणंमेस्याद्गर्भान्निरयसन्निभात् इतऊर्ध्वंनित्यमहंविष्णुमेवानुपूजये ३८

३४ तथाकुटुंबभरणासक्त्यातन्मात्रासक्त्या नतुधर्मासक्त्यान्यायान्यायैर्धर्म्याधर्म्यैरुपायैर्धनार्जनंकृतंमयेतिशेषः तथाविष्णुचिंतांस्व
प्नेपिनाकरवमहंनकृतवानित्यर्थः ३५ तत्फलभूतंगर्भदुःखंभुंजेइत्यन्वयः अशाश्वतेतत्क्षायःपतितजलबिंदुवन्नश्वरेदेहेशाश्वतवस्तु
नीवममेदंस्यादितीच्छायुक्तः ३६ नकृतमित्यस्यमयेतिशेषः अनुभूयेत्यस्यइदानींगर्भदुःखंभुंजेइत्यनेनान्वयः ३७ ३८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

योनियंत्रप्रपीडितः जन्मकाले भतएवार्तिदुःखेनजायमानः बहिः पततीतिशेषः नरकात्सानकोत्स्येकोहष्टांतः ३९ तथापूतिव्रणान्दु
र्गंधिव्रणान्निपतितोऽपरः कृमिरिव एषः पततीतिशेषः ततोबाल्यादिदुःखानिभुनक्ति एवंसर्वेजंतवोविभुंजतेनकश्चिदेवेत्यर्थः ४०
यानिसर्वाणिविदितानितानिमयावर्णितानि यानितुयौवनादिषुदुःखानिसर्वतः सर्वैःप्राप्याणि सर्वत्रसर्वेषुजंतुषुविदितानि स
र्वैर्ज्ञातानित्वयाचानुभूतानि सर्वविदितत्वादेवमयानवर्णितानि ४१ एवमिति इत्यस्मादित्याकारादभ्यासाज्जातादभिनिवेशतःअहं

इत्यादिचिंतयन्जीवोयोनियंत्रप्रपीडितः जायमानोऽतिदुःखेननरकात्पातकोयथा ३९ पूतिव्रणान्निपतितः कृ
मिरेषइवापरः ततोबाल्यादिदुःखानिसर्वेएवंविभुंजते ४० त्वयाचैवानुभूतानिसर्वचविदितानिच नवर्णिता
निमेगृध्रयौवनादिषुसर्वतः ४१ एवंदेहोहमित्यस्मादभ्यासान्निरयादिकम् गर्भवासादिदुःखानिभवंत्यभि
निवेशतः ४२ तस्माद्देहद्वयादन्यमात्मानंप्रकृतेःपरम् ज्ञात्वादेहादिममतांत्यक्त्वात्मज्ञानवान्भवेत् ४३
जाग्रदादिविनिर्मुक्तं सत्यज्ञानादिलक्षणम् शुद्धंबुद्धंसदाशांतमात्मानमवधारयेत् ४४

र्तेत्याद्याकारात् निरयस्वर्गादिकंगर्भवासादिदुःखानिचभवंतीत्यन्वयः ४२ देहद्वयात्स्थूलसूक्ष्मरूपात् प्रागुक्तादन्यंनहिप्रकृतिरेवसाने
त्याह प्रकृतेःपरंज्ञात्वादेहादिषुममतांअहंममेतिबुद्धिविषयतांत्यक्त्वाआत्मज्ञानवान् आत्मैवेदंसर्वमितिज्ञानवान्भवेत् ४३ ध्येयात्म
स्वरूपमाह जाग्रदादीति जाग्रत्स्वप्नसुषुप्त्याख्यावस्थात्रयरहितम् शुद्धंमायादोषालिसंबुद्धंबोधस्वरूपम् ४४ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अज्ञमविद्यातज्जन्येमोहेदेहादिषहंममनाख्ये नष्टेनाशंप्राप्ते देहस्थितौनाशेवा ४५ योगिनआत्मज्ञस्याज्ञानजे सुखदुःखे नभवतः या
वत्प्रारब्धक्षयो भवति तावद्देहेनसहितः सुखंतिष्ठ यथाकंचुकवान्सर्पोयावत्तत्त्यागकालंनदत्तेऽनंतरंत्यजति तद्वत् ४६ ४७ ४८

चिदात्मनिपरिज्ञाते नष्टेमोहेऽज्ञसंभवे देहःपततुवारब्धकर्मवेगेनतिष्ठतु ४५ योगिनोनहिदुःखंवासुखंवा
ज्ञानसंभवम् तस्माद्देहेनसहितोयावत्प्रारब्धसंक्षयः ४६ तावत्तिष्ठसुखेनत्वंधृतकंचुकसर्पवत् अन्यद्वक्ष्या
मितेपक्षिन्शृणुमेपरमंहितम् ४७ त्रेतायुगेदाशरथिर्भूत्वानारायणोऽव्ययः रावणस्यवधार्थायदंडकानाग
मिष्यति ४८ सीतयाभार्ययासार्द्धंलक्ष्मणेनसमन्वितः तत्राश्रमेजनकजांभ्रातृभ्यांरहितेवने ४९ रावणश्चो
रयन्नीत्वालंकायांस्थापयिष्यति तस्याःसुग्रीवनिर्देशाद्वानराःपरिमार्गणे ५० आगमिष्यंतिजलधेस्तीरंत
त्रसमागमः त्वयातैःकारणवशाद्भविष्यतिनसंशयः ५१ तदासीतास्थितिंतेभ्यःकथयस्वयथार्थतः
तदैवतवपक्षौद्वावुत्पत्स्येतेपुनर्नवौ ५२ संपातिरुवाच बोधयामाससमांचंद्रनामामुनिकुलेश्वरः
पश्यंतुपक्षौमेजातौनूतनावतिकोमलौ ५३ स्वस्तिवोस्तुगमिष्यामिसीतांद्रक्ष्यथनिश्चयम् यत्नंकुरु
ध्वंदुर्लंघ्यसमुद्रस्यविलंघने ५४

४९ परिमार्गणेतन्निमित्तम् ५० तीरमागमिष्यंतितैः सहकारणवशात्फलमिहका
रणंपक्षोत्पत्तिरूपफलायतैःसमागमोभविष्यति ५१ तदेवाह तदैवेति तवपक्षौद्वौनिश्चयमुत्पत्स्येतेइत्यर्थः ५२ ५३ निश्चयंद्र
क्ष्यथ तन्मुन्युक्तपक्षभवनिश्चयेनतदुक्तरावणवधोऽप्यवश्यंभावीसचनसीतादर्शनंविनेति तदप्यवश्यंभविष्यतीतिनिश्चयः ५४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यन्नामस्मरणमात्रात् कः कश्चिद्दुर्जनोऽपि इयानितपारम्छेदरहितं संसारसमुद्रं तीर्त्वा विष्णोः पदं गच्छति एवं दृश्यमानप्रकारेणाभिज
गतां स्थितिकारिणः सर्वजगदुत्पत्तिस्थितिलयकर्तुः स्थितिपदेनेतरदप्युपलक्ष्यते रामस्य भक्ताः प्रियाश्च यूयं शतयोजनपरिधि
न्नस्य समुद्रमात्रस्य तरणे किंकृतो न शक्ताः कथं च न शक्ता इति व्यतिरेकालंकारः ५५ इति श्रीमत्सकल० अध्यात्मरामायणे सेतौ
किष्किंधाकांडे अष्टमः सर्गः ८ गतेइति पक्षलाभादिति भावः हर्षेणेति महद् दरिष्टं गतमिति तस्य सदर्शनप्रत्ययेन सीतादर्शनमव

यन्नामस्मृतिमात्रतोऽपरिमितं संसारवारांनिधिं तीर्त्वा गच्छति दुर्जनोऽपि परमं विष्णोः पदं शाश्वतम् तस्यैव स्थि
तिकारिणः त्रिजगतां रामस्य भक्ताः प्रिया यूयं किन्न समुद्रमात्रतरणे शक्ताः कथं वानराः ५५ इति श्रीमदध्या
त्मरामायणे किष्किंधाकांडे अष्टमः सर्गः ८ श्रीमहादेव उवाच गते विहायसा गृध्रराजे वानरपुंगवाः हर्षे
ण महताविष्टाः सीतादर्शनलालसाः १ ऊचुः समुद्रं पश्यंतो नक्रचक्रभयंकरम् तरंगादिभिरुन्नद्धमाका
शमिव दुर्ग्रहम् २ परस्परमवोचन्वै कथमेनं तरामहे उवाच चांगदस्तत्र शृणुध्वं वानरोत्तमाः ३ भवंतोऽत्यंत ब
लिनः शूराश्च कृतविक्रमाः कोवात्र वारिधिं तीर्त्वा राजकार्यं करिष्यति ४ एतेषां वानराणां सः प्राणदाता न संशयः
अतोत्तिष्ठतु मे शीघ्रं पुरतो यो महाबलः ५ वानराणां च सर्वेषां रामसुग्रीवयोरपि स एव पालको भूयान्नात्र कार्या विचारणा ६

श्यं भावीति हर्षेण च १ नक्रचक्रं नक्रसमूहः तरंगादिभिः तरंगाः अल्पाः आदिना महत्यो लहर्यः दुर्ग्रहं दुःस्पर्शस्य आकाशस्य स्पर्शत्वं अस्यतु
ग्राहादियुक्तत्वात् २ कथमेनं तरामह इति परस्परमवोचन् इत्यन्वयः ३ कृतविक्रमाः पूर्वं बहुशः कृतपराक्रमाः को राजकार्यं करिष्यतीति तद्वद-
तीति शेषः ४ यस्तद्वदिष्यति अहं करोमीति स एषां प्राणदाता अतः यो महाबलः स शीघ्रमुत्तिष्ठतु अतोत्तिष्ठत्वित्यार्षः संधिः ५ भूयाद्भवेदित्यर्थे आ
र्षम् ६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

७सर्वैर्युष्माभिर्वैनिश्चयेनप्रत्येकंस्वस्वबलंउच्यतांततःकार्यसाधकंनिश्चेष्यामइत्यर्थः८ दशोत्तरगुणंदशसंख्योत्तरोगुणोयस्यतत् एकोदशपरोविंशतिःपरस्त्रिंशदित्येवंक्रमेण ९जांबवांस्तुनवतियोजनानीत्याहेत्यर्थःपुरात्रिविक्रमेदेवेऽवतीर्णेसतितदीयंभूमानंभूपरिच्छेद लक्षणंकार्यंयस्यतादृशंभूपरिच्छेदकंपादम् १०एकविंशतिवारंप्रदक्षिणविधानेना हमगांतत्परितइतिशेषः११ १२त्वंनोनियामकोस्माकं-

इत्युक्तेयुवराजेनतूष्णींवानरसैनिकाः आसन्नोचुःकिंचिदपिपरस्परविलोकिनः ७ अंगदउवाच उच्यतांवै बलंसर्वैःप्रत्येकंकार्यसिद्धये केनवासाध्यतेकार्यंजानीमस्तदनंतरम् ८ अंगदस्यवचःश्रुत्वाप्रोचुर्वीराबलंपृ थक् योजनानांदशारभ्यदशोत्तरगुणंजगुः ९ शतादर्वाक्जांबवांस्तुप्राहमध्येवनौकसाम् पुरात्रिविक्रमेदे वेपादंभूमानलक्षणम् १० त्रिःसप्तकृत्वोहमगांप्रदक्षिणविधानतः इदानींवार्द्धकग्रस्तोनशक्नोमिविलंघि तुम् ११ अंगदोऽप्याहमेगंतुंशक्यंपारंमहोदधेः पुनर्लंघनसामर्थ्यंनजानाम्यस्तिवानवा १२ तमाहजांबवान् वीरस्त्वंराजानोनियामकः नयुक्तंत्वांनियोक्तुंमेत्वंसमर्थोऽसियद्यपि १३ अंगदउवाच एवंचेत्पूर्ववत्स र्वैस्तप्स्यामोदर्भविष्टरे केनापिनकृतंकार्यंजीवितुंनचशक्यते १४ तमाहजांबवान्वीरदर्शयिष्यामितेकृत येनास्माकंकार्यसिद्धिर्भविष्यत्यचिरेणच १५इत्युक्त्वाजांबवान्प्राहहनूमंतमवस्थितम् हनूमन्किंरहस्तू ष्णींस्थीयतेकार्यगौरवे १६प्राप्तेज्ञेनेवसामर्थ्यंदर्शयाद्यमहाबल त्वंसाक्षाद्वायुतनयोवायुतुल्यपराक्रमः१७

माज्ञाकर्ताराजात्वंयद्यपिसमर्थोऽसितथापित्वामाज्ञप्तुंमेनयुक्तम् १३ कार्यंकेनापिनकृतंजीवितुंचनशक्यतेराजभयादतोमरणानि श्चयेनतपस्यामइत्यर्थः१४ कार्यसिद्धिर्भविष्यति अचिरेणचभविष्यति तंदर्शयिष्यामि १५ कार्यगौरवेगुरुतरकार्येप्राप्तेऽज्ञेनेव भवतातूष्णींस्थीयतइत्यन्वयः१६ अतःसामर्थ्यंदर्शय ननुसामर्थ्याभावेकिंदर्शनीयमितिचेन्नेत्याह त्वमिति १७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जनितोऽसि उत्पादितोऽसि विभावसुं सूर्यम् १८ जिघृक्षामीति ग्रहीष्यामीत्यर्थे आर्षम् योजनानां पंचशतमुत्प्लुतं ततो भुवि पति-
तः नोऽस्मान्पाहि रक्ष २० सिंहस्य नादं तस्येव नादमित्यर्थः २१ २२ आनेष्य इति छेदः रावणं गले बध्वा एकहस्ते गृहीत्वा वामपाणिना स

रामकार्यार्थमेव त्वं जनितोऽसि महात्मना जातमात्रेण ते पूर्वं दृष्ट्वोद्यंतं विभावसुम् १८ पक्वं फलं जिघृक्षामी-
त्युत्प्लुतं बालचेष्टया योजनानां पञ्चशतं पतितोऽसि ततो भुवि १९ अतस्त्वद्बलमाहात्म्यं को वा शक्नोति वर्णितुम् उ-
त्तिष्ठ कुरु रामस्य कार्यं नः पाहि सुव्रत २० श्रुत्वा जांबवतो वाक्यं हनूमानतिहर्षितः चकार नादं सिंहस्य ब्रह्मांडं
स्फोटयन्निव २१ बभूव पर्वताकारस्त्रिविक्रम इवापरः लंघयित्वा जलनिधिं कृत्वा लंकां च भस्मसात् २२ रावणं
सकुलं हत्वानेष्ये जनकनंदिनीम् यद्वा बध्वा गले रज्वा रावणं वामपाणिना २३ लंकां सपर्वतां धृत्वा रामस्या-
ग्रे क्षिपाम्यहम् यद्वा दृष्ट्वैव यास्यामि जानकीं शुभलक्षणाम् २४ श्रुत्वा हनूमतो वाक्यं जांबवानिदमब्रवीत्
दृष्ट्वैवागच्छ भद्रं ते जीवंतीं जानकीं शुभाम् २५ पश्चाद्रामेण सहितो दर्शयिष्यसि पौरुषम् कल्याणं भवता-
द्भद्र गच्छतस्ते विहायसा २६ गच्छंतं रामकार्यार्थं वायुस्त्वामनुगच्छतु इत्याशीर्भिः समामंत्र्य विसृष्टः प्लु-
वगाधिपैः २७ महेंद्राद्रिशिरो गत्वा बभूवाद्भुतदर्शनः २८ महानगेंद्रप्रतिमो महात्मा सुवर्णवर्णोऽरुणचारु-
वक्त्रः महाफणींद्राभसुदीर्घबाहुर्वातात्मजो दृश्यत सर्वभूतैः २९ इति श्रीमदध्यात्मरामायणे कि-
ष्किंधाकांडे उमामहेश्वरसंवादे नवमः सर्गः ९

पर्वतां लंकां धृत्वा रामाग्रे क्षिपामि २३ यद्वेति सीताया आनयने रामाज्ञाभा-
वादिति भावः दृष्ट्वैवेति २४ दृष्ट्वैवेति न तु तां गृहीत्वा नापि रावणादीन् गृहीत्वेत्यर्थः २५ भवतात् आशिषि लोट् २६ वायुस्त्वामनुगच्छ-
त्विति शकुनप्रार्थनं समामंत्र्य योजयित्वा २७ अद्भुतदर्शनः अतिमहाशरीरत्वात् २८ तदेवाह महानगेंद्रेति २९ इति श्रीमत्स॰ कि॰ नवमः सर्गः ९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिश्रीमदध्यात्मरामायणेकिष्किंधाकांडंसमाप्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=18.01.20 11:34
,TRANSFERRED=2020/01/18 at 11:38:59
,PAGES=35
,TYPE=STD
,NAME=S0002556
,Book Name=M-2420(4)-SHRIMAD ADHYATAM RAMAYAN KISHKINDHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection